विमलबोधः ॥ “इह तन्त्रं वासनाजालम् ।” इति नीलकण्ठः ॥)

तन्त्रकं, क्ली, (तन्त्रात् सूत्रवापात् अचिरापहृतम् । तन्त्र+“तन्त्रादचिरापहृते । ५ । २ । ७१ । इति कन् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११२ ॥

तन्त्रकाष्ठं, क्ली, (तन्त्रस्थं काष्ठम् ।) तन्त्रवायस्य तुरी । इति त्रिकाण्डशेषः ॥

तन्त्रता, स्त्री, (तन्त्रस्य भावः । तन्त्र+तल् ।) अनेकसुहृिश्य सकृत्प्रवृत्तिः । यथा ।“आग्नेयाष्टाकपालेन्द्रदध्यैन्द्रपयोयागानां त्रयाणां आग्नेयाष्टाकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां त्रयाणां सकृत् सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिध्यति ।” “तथा नानाब्रह्मवधसत्त्वे सर्व्वोद्देशेन सकृत् प्रायश्चित्ते कृते ब्रह्मवधजन्यपापनाशः ।” “तन्त्रताया हेतुश्च । अष्टार्थैकजातीयकर्म्मणः काष्ठदेशकर्त्तादीनां प्रयोगानुबन्धविधहेतुभूतानामभेदे उद्देश्यविशेषायश्च इति । एवञ्च ।
‘स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि । पवित्राणां तथा जाप्ये दाने च विधिदर्शितः ॥’
इति विष्णूक्तम् ॥
‘अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन ।’ इति दर्शोक्तञ्च क्रियाङ्गस्नानं कर्त्तृसंस्कारद्वारैव तद्दिनकर्त्तव्याशेषकर्म्मार्थमेकमेव न तु प्रतिकर्म्म कर्त्तव्यम् ।” इति प्रायश्चित्ततत्त्वम् ॥

तन्त्रवापः, पुं, (तन्यते विस्तीर्य्यते इति तन्त्रं सूत्रम् । तत् वपतीति । वप+“कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) तन्त्रवायः । तन्त्रे, पुं क्ली । इति शब्दरत्नावली ॥

तन्त्रवायः, पुं, (तन्त्रेण वयतीति । वे ञ तन्तुसन्ताने +“ह्वावामश्च ।” ३ । २ । २ । इत्यण् ।) वर्णसङ्करजातिविशेषः । ताँति इति भाषा । अस्योत्पत्तिर्यथा, पराशरपद्धतौ ।
“ताम्रकुट्टाच्छङ्खकार्य्यां मणिकारश्च जायते । मणिकारात् ताम्रकुट्टां मणिवन्धोऽप्यजायत । मणिवन्धान्मणिकार्य्यां तन्त्रवायाश्च जज्ञिरे ॥”
तत्पर्य्यायः । कुविन्दः २ । इत्यमरः ।२।१०।६॥ तन्त्रवापः ३ । इति भरतः ॥ तन्तुवापः ४ । इति जटाधरः ॥ तन्तुवायः ५ । इति शब्दरत्नावली ॥ लूता । इत्यमरटीकायां स्वामी ॥

तन्त्रिका, स्त्री, (तन्त्री एव । तन्त्री+स्वार्थे कन् । पूर्व्वह्रस्वश्च ।) गुडूची । इत्यमरः । २।४।८२ ॥ (यथास्याः पर्य्यायाः ।
“गुडूचीमधुपर्णी स्यादमृतामृतवल्लरी । छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥ जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली । चक्रलक्षणिका वीरा विशल्या च रसायनी ॥ चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तन्त्रिपालकः, पुं, जयद्रथराजः । इति शब्दमाला ॥

तन्त्रीः, स्त्री, (तन्त्रयति मोहयति लोकानिति । तन्त्र+“अवितॄस्तृतन्त्रिभ्य ईः ।” उणां । ३ । १५८ । इति ईः ।) वीणागुणः । (यथा, रामायणे । २ । ३६ । २६ ।
“नातन्त्रीर्विद्यते वीणा नाचक्रो विद्यते रथः ॥”
वीणा । यथा, तत्रैव । १ । २ । १८ ।
“पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः । शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥”)
गुडूची । देहशिरा । इति मेदिनी ॥ नदीविशेषः । युवतीभेदः । इति शब्दरत्नावली ॥ रज्जुः । इति हेमचन्द्रः ॥ (यथा, मनुः । ४।३८ ।
“न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति । न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥”)

तन्त्रवायः, पुं, (तन्त्रवायः निपातनात् तस्य दः ।) तन्त्रवायः । इत्यमरटीकायां रायमुकुटः ॥

तन्द्रा, स्त्री, (तत् द्रातीति । तत्+द्रा+कः । निद्रातन्द्रेति नान्तत्वं निपात्यते । यद्वा, तन्द्र अवसादे+भावे घञ् ततष्टाप् ।) निद्रा । आलस्यम् । इति हेमचन्द्रः ॥ (यथा, हठयोगप्रदीपिकायाम् । ३ । ३६ ।
“न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा ॥”)
तस्या निदानं यथा । “तमोवातकफात्तन्द्रा ।” इति । लक्षणञ्च ।
“इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः । निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्द्दिशेत् ॥”
इति माधवकरः ॥
(कारणपूर्व्वकमस्याः सम्प्राप्तिर्लक्षणं चिकित्सितञ्च यथा, चरके सिद्धिस्थाने नवमेऽध्याये ।
“मधुरस्निग्धगुर्व्वन्नसेवनाच्चिन्तनाद्भयात् । शोकाद्व्याध्यनुषङ्गाच्च वायुनोदीरितः कफः ॥ यदासौ समवस्कन्द्य हृदयं हृदयाश्रयान् । समाश्रयेत तदा नादींस्तदा तन्द्रोपजायते ॥ हृदये व्याकुलीभावो वाक्चेष्टेन्द्रियगौरवम् । मनोबुद्ध्यप्रसादश्च तन्द्राया लक्षणं मतम् ॥ कफघ्नं तत्र कर्त्तव्यं शोधनं शमनानि च । व्यायामो रक्तमोक्षश्च भोज्यञ्च कटुतिक्तकम् ॥”)

तन्द्रालुः, त्रि, (तत् द्रातीति । तत्+द्रा+“स्पृहि गृहीति ।” ३ । २ । १५८ । इति आलुच् तत्शब्दस्य नान्तत्वं निपात्यते ।) निद्रालुः । इति जटाधरः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
“अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् ॥”)

तन्द्रिः, स्त्री, (तदि मोहे धातुः+“वह्यश्यादयश्च ।” उणां । ४ । ६६ । इति क्रिन् ।) निद्रा । आलस्यम् । इत्युणादिकोषः ॥ (यथा, भागवते । ३ । २० । ४० ।
“दृष्ट्वा भूतपिशाचांश्च भगवानात्मतन्द्रिणा । दिग्वाससो मुक्तकेशान् वीक्ष्य चामीलयद्दृशौ ॥”)

तन्द्रिका, स्त्री, (तन्द्रिरेव । स्वार्थे कन् टाप् च ।) तन्द्रिः । इति शब्दरत्नावली ॥

तन्द्री, स्त्री, (तन्द्रि+“कृदिकारादिति ।” वा ङीष् ।) अत्यन्तश्रमादिना सर्व्वाङ्गेन्द्रियाप्रसुत्वम् । अत्यन्तश्रमादिना सर्व्वाङ्गनिमीलनं निःसहतेति यावत् इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । प्रमीला २ । इत्यमरः ॥ तन्द्रा ३ तन्द्रिः ४ । इति तट्टीका ॥ तन्द्रिका ५ विषयाज्ञानम् ६ । इति राजनिर्घण्टः ॥ (यथा, महाभारते । ३ । ३०३ । १६ ।
“निक्षिप्य राजपुत्त्री तु तन्द्रीं मानं तथैव च । आतस्थे परमं यत्नं ब्राह्मणस्याभिराधने ॥”)
निद्रा । इति मेदिनी । रे, ४२ ॥ (केचित्तु तन्त्रधातोर्बाहुलकात् ईप्रत्ययेन तन्द्रीरिति पदं कल्पयन्ति यथा, चरके सूत्रस्थाने चयोदशेऽध्याये ।
“पाण्डुता गौरवं जाड्यं पुरीषस्याविपक्वता । तन्द्रीररुचिरुत्क्लेशः स्यादतिस्निग्धलक्षणम् ॥”)

तन्निः, स्त्री, (तन्नयतीति । नी+बाहुलकात् ड्विः ।) चक्रकुल्या । इति रत्नमाला ॥ तन्विरपि पाठः ॥

तन्मात्रं, क्ली, (तदेवेति । तत्+एवार्थे मात्रच् । यद्वा, सा मात्रा यस्य ।) अपञ्चीकृतरूपरसगन्धस्पर्शशब्दानां संज्ञा । यथा,—
“इमान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ।” इति वेदान्तसारः ।२७॥ तट्टीका यथा । “नन्वयाकृतात् पञ्चतन्मात्राणि क्रमेण जायन्ते इति हि श्रुतीतिहासपुराणेषु प्रसिद्धिः तत् कथमाकाशादेरिहोत्पत्तिराम्नायते इति तत्राह एतान्येवेति । एतान्येवाकाशादीनि सूक्ष्मभूतानि व्यवहाराक्षमाणि शब्दादितावन्मात्रैकस्वभावानि अपञ्चीकृतानि परमसंस्थानि चेति सूत्रादिष्वभिधीयन्ते महर्षिभिरित्यर्थः ॥” इति विद्वन्मनोरञ्जिनी ॥ * ॥ अपि च ।
“भूतादिस्तु विकुर्व्वाणः सर्गं तन्मात्रिकं ततः । ससर्ज्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ॥”
इति विष्णुपुराणे १२ अध्यायः ॥

तन्यतुः, पुं, (तनोति विस्तारयति तमः शब्दं वा । तनु विस्तारे+“ऋतन्यञ्जिवनीति ।” उणां ।४। २ । इति यतुच् ।) रात्रिः । वातम् । इत्युणादिकोषः ॥ (वायुः । इत्युज्ज्वलदत्तः ॥ अशनिः । इति माधवः ॥ विद्युत् । इति दयानन्दः ॥ यथा, ऋग्वेदे । १ । ५२ । ६ ।
“वृत्रस्य यत् प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वो रिन्द्रतन्यतुम् ॥”)

तन्वी, स्त्री, (तनुः+“वोतो गुणवचनात् ।” ४ । १ । ४४ । इति ङीष् ।) कृशाङ्गी । यथा,—
“तव तन्वि ! कुचावेतौ नियतौ चक्रवर्त्तिनौ । आसमुद्रकरग्राही भवान् यत्र करप्रदः ॥”
इति कालिदासः ॥
शालपर्णी । इति राजनिर्घण्टः ॥ (चतुर्विंशत्यक्षरवृत्तिविशेषः । इति छन्दोमञ्जरी ॥ तस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

तप, क दाहे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, तापयति । व्ययमात्मनेपदीत्यन्ये । इति दुर्गादासः ॥